नं० ४८५०

नाम - रुद्रयामल तंत्रे बटुकभैरवपञ्चाङ्गम्

कर्ता ×

पत्र सं० ५८ पत्राणि सं०

विषयः - तंत्रम्

बटुकभैरवपंचाङ्ग. सू

४८५०

4850
1 to 15
1 to 43
F = 58

रिणीप्रियः हाटकेशो हटेशानो हरांकस्थप्रदर्शनः हाटको
हाटकप्राणो हाटभूषणभूषितः हेतिदो हंसको हंसो हंसी
गतिर्हंसाक्षयः हंसीपतिर्हंसात्मनो हंसीशो हरूरवल्लभः हार
भूषप्रभो हंसीप्रियो हंसविलासकः हरबीजरतो हारी हरितो
हरितांपतिः हरित्प्रभ हरित्पालो हरिदंतरनायकः हारे
दीप्तो हरिप्राणो हरिप्रियाप्रियो हितः हेरंबो हेरुकातिः हेरुको हे
रंबानंदनो हरी हेरंबप्राणसंहर्ता हेरंबहृद्दयप्रियः हामाप
तिः हणहांतः हारयारः हितेश्वरः हितीशः हितनिरन्ली

नी

वं सं ९९

णः क्षितिपालः क्षितिभृत् क्षितीशानः क्षितीप्राणः क्षितिना

यकसत्प्रियः क्षितिराजः क्षणाधीशः क्षणदाप्राणदः क्षमी

क्षमः क्षोणीपतिः क्षोभः क्षोभप्रदः क्षमाप्रियः क्षमाशीलः

क्षमारूपः क्षमामंडलमंडितः क्षेमनाथः क्षमाधारः क्षमाक

तीक्षमाधरः क्षोमः क्षीणरजः क्षुद्रः क्षुद्रपालविशारदः क्षु

द्राशनः क्षणकारः क्षीरपानकतत्परः क्षीरशौर्याक्षणेशा

नः क्षोणीभृत्क्षणदोत्सवः क्षेमंकरः क्षमात्त्तुः क्षमाःशास्त्रवि

शारदः क्षमीशश्चक्षमाकारः क्षमाहृदयमंडनः नीलाम्बर

ति

31

९९

विरोलेशो नीलपर्वतसन्निभः नीलमणिप्रभास्यः फणिभू
षणभूषितः मुंडस्रग्मुंडसंतप्तोऽखंडमालाधरोनघः दिग्वा
साविदिग्गकारो दिगंबरवरप्रदः दिगंबरीशश्मशानेशो दिगंब
रीप्रियनंदनः पिंगलैकजटोऽष्टडमरुवादनप्रियः सृणीक
रः स्थाणीशानः खट्वांगकाखड्गपालकः शूलहस्तोमतंगाभोमा
तंगोन्मदवशंदरः अभयंकरसैकोलंकापतिविनाशनः नागा
शयोनगेशानोनागमंडलमंडितः नागाकारोनगाधीशोना
गस्थाधीनगाप्रियः चक्रोत्सवोच्चटाकारोघंटाकारविशारदः क

व॰ स॰ ४४

फालपाणिरंबेशः कपालाशनशासृदः पद्मपाणिः करालास्यस्त्रिने
त्रोनागवल्लभः किंकिणीनागसंतेशोजलाशयोजलाकरः अप
स्मृहारोमायामोहमूलविनाशनः श्रावृक्षः कमलानाथः कम
लाकांतवल्लभः राज्यदोराजराजेशोराजीवपदशोभनः डाकि
नीनायकोनित्योनित्यधर्मपरायणः डाकिनीहृदयस्थानीडाकि
नीदेहनाशनः डाकिनीर्प्रणदः षंडः षडेषचारिनेविभः हिमाभ
श्चहिमिवगनोहिमानीप्रियदर्शनः हेमदोजन्मदोनामोनामदे
वोनगात्मजः वैजं तेवासकिप्राणोवाहाकिकंवभूषणः अंड १२

लीघेशसर्वेशःश्रीमहाराजो महेश्वरः ज्ञलोकाशोऽज्ञबोधीशो ज्ञाल
मालाविभूषणः ग्रंथिकावल्लभो वाणीपतिर्वाणीविशारदः
वाणीशो वचनप्राणो वचनस्थो विनप्रियः वेलाधरो दिशाधीशो
दिग्गो दिग्दिवेश्वरः हर्षाशिषोऽङ्गराराध्यो दरिद्राभयभंजनः त
र्कतर्कप्रियस्तर्को वितर्कस्तर्कवल्लभः तर्कसिद्धो निसिद्धात्मा
सिद्धदेहो गुहाशयः गुहगर्भो गुहेशानो गंधगंधो विशारदः मं
गलो मंगलाकारो मंगलवाद्यवारकः मंगलेशो विमानस्थो
विमानस्थैकनायकः ज्ञपेशो विज्ञयाधीशो ज्ञयवशो ज्ञयाकरः

व॰ स॰ ३२ ऋभुपनाथोऋभुपप्रेष्ठोऋभुपवाग्योऋभुपप्रियः सोमेशोमकुटेकाकारः
सोमपःसोमनायकः सोमप्रभोमनंसिद्धोमनोज प्राणनायकः
कामहाकामगोवोढः कामनाफलदोधिपः त्रिदशेशदशाराधे
येशोदशाननविनाशनः लक्ष्मणोलक्ष्मसंवनीलक्ष्मसंव्योमनः
33 प्रियः नलकोतिर्नलोभस्याह्वानरदेवोनराकृतिः नरपतिर्नी
देशानोनारायणोनलेश्वरः प्रनिलोमाहृतोमोसीमंसेकर
सेविनः मारीचिरमणोरणनोमागधोमागधप्रभः संदरी
सेवकोद्वारीद्वारदेशनिवासवान् देवकीगर्भसंजातोदेवकी

सेवकः ऊर्जः बृहस्पतिः कविः शुक्रः शर्वदः साधकप्रियः
धनुर्दासाधकश्रमणाभार्वदः सेवकोन्तकः धनुर्दासाधक
श्रेष्ठो वीतरागो जगत्प्रभुः मांसप्रियो मधुप्राशो मधुमांसम
ह्लोत्सवः मधुपो मधुपश्रेष्ठो मधुपानसदारतिः मोदकादा
नसंप्रीतो मोदकामोदमोहितः प्रमोदानंदितो नंदो नंद
केशो नदीश्वरः नदीप्रियो नदीनाथो नदीतीरतनस्तपः त
पनस्तापनस्तमातापहा तापकारकः पतंगो गोगोमुखो गौ
रीशो गोपालो गोपवर्धनः गोपतिर्गोपसंहर्ता गोवृन्दैकप्रियो

व॰ स॰ ३४ गिरो वागविशोजगगम्यस्तिं पूर्वं पुरुषोत्तमप्रियः जगत्सृष्टोजग
येनोजगत्त्वायोजगतोत्सवः जगदीशः केवलो गर्भः स्वगर्भोग
र्भरक्षकः गांभीर्यरत्नकोद्वर्ताविपत्तौ भक्तपालकः जगदी
शोजगन्मित्रोजगद्ज्ञाताजगत्प्रियः जगद्ज्ञाताजगद्गाङ्काजग
ज्ञाड्यविनाशनः जगत्कर्ताजगद्धर्ताजगज्जीवनजीवनः मा
लतीशष्पसंशोभितामालतीकुसुमोत्सवः मालतीकुसुमाका
रोमालतीकुसुमप्रभः रसालमंजरीरम्योरसालगंधलाल
सः केतकीपत्रसंकाशः केतकीपत्रनाशनः गर्भस्थोगत

रा=२ रा=१

गंभीरागंभीरो गंगानायकः गंगनगोचरो दिगंतस्थो गंगनतीरनि
वासनः गगनेश्वरो गगनाध्यक्षो गगनराजो गगनकंचः आनंदभै
रवो भीमभैरवेशानरुभैरः कपालभैरवो वामभैरवो वीक्षनभा
वनः भैरवीनतनयो देवीपुत्रः पर्वतसंभवः १०० ओंनमो नमः
ओं नाम्नामनेनसहस्रेण स्तवा वटुकभैरवम् लभते स्तवलांसि
द्धिं देवानामपिदुर्लभाम् उपदेशं गुरोर्लब्ध्वा योगीचिमंडली
भवेत् ग्रहणे वा वत्सदर्शे वाप्यसरे भूमिनंदने शुक्रेवारवि
संक्रान्तौ योगिगायत्र्यमसंशुभो तस्मिन्योगे महेश्वानि सर्वसिद्धि

व॰ मवाप्नुयात् तद्भावर्तनान्मंत्री मंत्रराजं न गोपयम् नित्यकर्म
स स्य सिद्धर्षीतत्फलं लभते ध्रुवम् स्तवमेनं पठेन्मंत्री पाठयेद्वा
३५ यथाविधि। दुर्लभां लभते सिद्धिं देवानामपि दुर्लभाम् न
प्रकाश्यं कुत्रचाप्यग्रेभ्यो न कदाचन अन्यथा सिद्धिरोध
35 स्यावर्ततेलोकाभवेत्स्थिर स्तवस्यास्य प्रसादेन देवतायाः सम या:
प्रभः संग्रामे विजयी क्षुद्रन्मातंगानि वक्के सरी राजानं वश
येत्तस्य देवानपि वशं नयेत् किमपरं फलेनाथ स्तवराज
स्य कथ्यताम् यद्यन्मनसि संकल्प्य स्तवमेनं उदीरयेत् तत्त ३५

हाज्ञोनित्देवेशिवटुकस्यप्रसादतः आपदांहिविनाशाय का
रणंकांतदुर्लभम् देवासुरगणैर्घोरैर्देवानामपिकारकम्
प्रकाशितंमयानाथतंत्रेभैरवदीपके प्रज्ञांवालभतेपुत्रंच
णमासंचरितंनुरम् पठित्वापाठयित्वापिलवराजमनुत्तम
म् दरिद्रोलभतेलक्ष्मीमीप्सितामपिनिश्चलाम् कन्यार्थी
लभतेकन्यांरूपसल्लक्षणान्विताम् ग्रहदोषबलिदानेनव
शयेदखिलंजगत् वटेवाबिल्वमूलेवारंभायाविपिनेपिवा
जपेत्सततमालिख्यमंत्रराजंमहासिद्धये षण्मासंजपेद्वापिदि

लक्ष्यसंख्यकमित्यर्थः

रात्र

36

बं॰ स॰ २९

ध्यात्वैवं हृत्प्रकाशितम् होमयेत्तु तिलैः साज्यैर्द्रव्यैः मांसैः फलैस्तथा
मांसैः पक्वान्नसंयुक्तैः वटुकैर्बर्बरैस्तथा पूजयेद्वटुकं देवं स्त
वमेनं तु धारयेत् पठेद्वा पाठयेद्वापि स्तवमेनं सुराधिपः शाङ्के
न भयं तस्य नाग्निचौरस्तु वज्रकम् ज्वरादिकं भवेन्नापि सत्यं
सत्यं महेश्वरि भैरवाराधनात्सौ यो भवेत्साधकपुङ्गवो सदा
शिवं स विज्ञेयो भैरवेणेति भाषितम् श्रीमद्भैरवराजसेवनवि
धौ वैयाममासेडः खंडमः पंचविधो भवंतिनवयाह्रहोम
हासिद्धयः क्षोणीपालकिरीटकोटिमणिभिर्महाप्रभावैः ९

पुनमैगंथ्यपाद्रपयोजयोर्विजयते मूर्ध्नि प्रभोश्छत्रताम् ॥ इति श्री
रुद्रयामले तंत्रे श्रीमहाभैरवपार्वतीसंवादे महारहस्ये श्रीआप
दुद्धारणबटुकभैरवसहस्रनामसंपूर्णम् ॥ ॥
ॐ अथ स्तोत्रम् ॐ मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम् शंकरं
परिपप्रच्छ पार्वती परमेश्वरम् श्रीदेव्युवाच ॐ भगवन्सर्वधर्मज्ञ
सर्वशास्त्रागमादिषु आपदुद्धारकं मंत्रं सर्वसिद्धिप्रदं नृणाम् स
र्वेषां सर्वभूतानां हितार्थं वांछितं मया विशेषतस्तु राज्ञां वै शां
तिपुष्टिप्रदायकम् अंगन्याससकरन्याससदेहन्याससमन्वितम्

ब॰ स्तो॰ ३७

37

वक्त्राम्भोरुहासि देवेश सर्वसिद्धिविवर्धनम् श्रीभैरवः ॐ स्थापद्देविप्र
वक्ष्यामि आपदुद्धारहेतुकम् सर्वदुःखप्रशमनं सर्वशत्रुविनाश
नम् अपस्मारादिरोगाणां ज्वरादीनां विशेषतः घरंटं कीर्तयेन्म
र्त्यः सर्वदुःखविवर्जितः सर्वान्कामानवाप्नोति साधकः सिद्धिमे
व च प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुच्चरेत् बटुकायेति च पश्चादा
पदुद्धारणाय च कुरुद्वयं ततः पश्चाद्बटुकाय पुनः क्षिपेत् दे
वीप्रणवमुद्धृत्य मन्त्रोद्धारमिमं प्रिये मन्त्रोद्धारमिमं देवि त्रैलोक्य
स्यापि दुर्लभम् अप्रकाश्यमिमं मन्त्रं सर्वशक्तिसमन्वितं स्मरणा

इस्यमंत्रस्य भूतप्रेतपिशाचकाः । विद्रवंति भीतास्ते कालरुद्रा
दिव ॥ प्रजाः पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् । नाग्निचौर
भयं वापि ग्रहराजभयं तथा । न च मारीभयं किंचित्सर्वत्र सुखभा
ग्भवेत् । आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः । भवंति सततं त
स्य पुस्तकस्यापि पूजनात् । पार्वत्युवाच । यश्च भैरवो नाम आपदुद्धार
णो मतः । त्वया च कथितो देवो भैरवः कल्प उत्तमः । तस्य नामसह
स्राणि ह्ययुतान्यर्बुदानि च । सारभूतानि तेषां मे नामाष्टशतकं व
द । देहांगन्यासकं चैव पूर्वं कुर्याद्विचक्षणः । भैरवं मूर्ध्नि विन्यस्य

वं
लो॰
३८

38

ललाटे भीमदर्शनम् अक्ष्णोर्भूताशयं न्यस्य वदने तीक्ष्णदर्शनम्
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् क्षेत्राख्यं नाभिदेशे तु क
ट्यां सर्वाघनाशनम् त्रिनेत्रमूर्वोर्विन्यस्य जंघयो रक्तपानकम्
पादयोर्देवदेवेशं सर्वांगे वटुकं न्यसेत् एवं न्यासविधिं कृत्वा नामा
ष्टशतकं ततः यानि संकीर्त्तयन्मर्त्यः सर्वदुःखविवर्जितः सर्वा
न्कामानवाप्नोति साधकः सिद्धिमेव च भैरवः शृणु देवि प्रव
क्ष्यामि भैरवस्य महात्मनः आपदुद्धारकं देवि नामाष्टशतमुत्त
मम् सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् सर्वकामार्थदं दे

विनायकानां स्तवो वहन् नामाष्टशतकस्यास्य छंदोनुष्टुप्प्रकी
र्तितम् बृहदारण्यको नाम ऋषिर्देवो हि भैरवः अस्य श्रीवटुकभैर
वस्तोत्रमंत्रस्य बृहदारण्यकऋषिः अनुष्टुप्छंदः श्रीवटुकभै
रवोदेवता नामाष्टशतकपाठे विनियोगः ॐ भैरवाय नमः मूर्ध्नि
भीमदर्शनाय नमः ललाटे भूतनाथाय नमः नेत्रयोः सारमेया
नुगाय नमः भ्रुवोः भूतनाथाय नमः कर्णयोः प्रेतवाहनाय न
मः कपोलयोः भस्मांगाय नमः नासापुटयोः सर्वार्थरूपाय न
मः ओष्ठयोः अनादिभूताय नमः आस्ये शक्तिहस्ताय नमः कंठे

दैत्यशमनायनमः स्कंधयोः ज्वलन्नेत्रायनमः बाह्वोः करालिनेन
मः पाण्योः मुंडमालिनेनमः जत्र्वोः दंष्ट्रायनमः वक्षे कामचा
रिणेनमः स्तनयोः महानादायनमः उदरे क्षेत्रेशायनमः पार्श्वयोः
क्षेत्रपालायनमः पृष्ठे क्षेत्रज्ञायनमः नाभौ पापौघनाशनायन
मः कट्यां वटुकायनमः गुह्ये रक्तकायनमः ऊर्वोः रक्तलोचना
यनमः भ्रुवोः त्रुट्युराख्यायनमः जान्वोः रक्तपालिनेनमः जंघ
योः पादुकासिद्धायनमः गुल्फयोः सुरेश्वरायनमः पादपृष्ठे
आपदुद्धारकायनमः मस्तके डमरुहस्तायनमः मूर्ध्नि दंडपा

39

रितोनमः दक्षिणे खेडूहस्ताायनमः पश्चिमे चंडनाथायनेन
मः उत्तरे अग्निवर्णायनमः आग्नेय दिगंबरायनमः नैरृते स
र्वभूतनाथायनमः वायवे अप्रसिद्धायनमः ईशाने खेचरीणन
मः ऊर्ध्वे सैंहिकेयपितेनमः पाताले इति देहन्यासः भूतनाथा
यनमः हृदये आदिनाथायनमः मूर्ध्नि आनंदपादनाथायन
मः शिखायां सिद्धमाननाथायनमः कवचाय सहजानंदना
थायनमः नेत्रयोः निस्सीमानंदनाथायनमः अस्त्राय ॐफ्रां
वांग्रंवह्याभ्यां हृदयायनमः एवंन्यासं ध्यानं ॐ स्वाविकी र

व॰
स्तो॰
५

जसी नामसौ २ ॐ करकलितकपालः कुंडली दंडपाणिस्त
रुणतिमिरनीलो व्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्न
विच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम् ॐ भै
रवो भूतनाथश्च भूतात्मा भूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षे
त्रदः क्षत्रियो विराट् श्मशानवासी मांसाशी खर्पराशी स्मरां स्म
न्तकृत् रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः कंकालः
कालशमनः कलाकाष्ठातनुः कविः त्रिनेत्रो बहुनेत्रश्च तथा
पिंगललोचनः शूलपाणिः खड्गपाणिः कंकाली धूम्रलो ४.

50

भीन

चनः अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः धनदो धनहा
री च धनवान्श्रनि[illegible]वान् नागहारो नागपाशो व्योमकेशः
कपालभृत् कालः कपालमाली च कमनीयः कलानिधिः त्रि
लोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात् त्रिनेत्रतनयो डिंभः
शांतः शांतजनप्रियः वटुको वटुवेशश्च खट्वांगवरधारकः
भूताध्यक्षः पशुपतिः भिक्षुकः परिचारकः धूर्तो दिगंबरः शू
रो हरिणः पांडुलोचनः प्रशांतः शांतिदः शुद्धः शंकरप्रियबां
धवः अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः अष्टाधारः षडाधारः

ड॰ नाथो = ४ भरतो

व॰ सर्पयुक्तःशिखावीरवः भूधरो भूधराधीशो भूपतिर्भूधरात्मजः
स्तो॰ कंकालधारी मुंडी च सर्पयज्ञोपवीतकः जृंभणो मोहनः स्तंभी मा
३८ रणः क्षोभणस्तथा शुंडो नीलांजनप्रख्यो दैत्यहा मुंडभूषितः ब
१ लिभुग् बलिभुङ्नाथो बालो बालपराक्रमः सर्वापत्तारणो दुर्गा ता
दुष्टभूतनिषेवितः कामी कलानिधिः कांतः कामिनीवशकृद्वशी
शी सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुरितीव हि अष्टोत्तरशतं नाम्नां प्रतापवान्
भैरवस्य महात्मनः मया ते कथितं देवि रहस्यं सर्वकामिकम् य इ
दं पठति स्तोत्रं नामाष्टशतमुत्तमं न तस्य दुरितं किंचिन्न रो गा

गार्हाभयेनथा नचमारीभयं किंचिदाप्नुयान्मानवः क्वचि
त् पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः मारीभये राज
भये तथा चौराग्निजे भये औत्पातिके महाघोरे तथा दुःस्वप्नद
र्शने बंधने च महारोगे पठेत् स्तोत्रमनुत्तमम् सर्वं प्रशममायाति
भयं भैरवकीर्तनात् एकादशसहस्रं तु पुरश्चरणमुच्यते य
स्त्रिसंध्यं पठेद्देवि संवत्सरमतन्द्रितः स सिद्धिं प्राप्नुयादिष्टां दु
र्लभामपि मानवैः षाण्मासाभूमिकामस्तु जप्त्वा प्राप्नुया
न्महीम् राजशत्रुविनाशार्थं जपेन्मासाष्टकं विभुम् रात्रौ वा

वं॰ रिद्र्यं चैव नाशाय देहि विद्यां वराम् पठेत्स्नात्वा सद्वयं मन्त्री राजानं व
स्लो॰ शमानयेत् धनार्थी विसन्नार्थी विदारार्थी चापि मानवः पठेत्स्नात्
४२ द्वयं देवि वारमेकं तथा निशि धनं पुत्रं तथा दारान्स्वाम्याद्याव
रोगात् प्नुयात् रोगार्तो मुच्यते बद्धो मुच्येत बन्धनात् भीतो भया
न्मुच्येत देवि सत्यं न संशयः यं यं समीहते कामं तं तं प्रा न्
प्नोत्यसंशयः अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् उली
नाय पुत्र शान्ताय देवेश्यां सुविशारदे इति स्तोत्रमिदं ज्ञाणं सर्व
कामफलप्रदम् ॥ पठनात्स्मरणान्नतो देवि नाशं मत्वा नरशानम् ४२
पवितवं घ्या
52

ॐ भावभूतीशायनमः ॐ तिर्यकीशायनमः ॐ स्थाणुशायनमः ॐ हरीशायनमः ॐ किटीशायनमः ॐ भौतिकेशायनमः ॐ सद्योजातेशायनमः ॐ अनुग्रहेशायनमः ॐ अक्रूरेशायनमः ॐ महासेनेशायनमः इति षोडशदलपूजनं अथ द्वात्रिंशद्दलपूजनं ॐ क्रोधीशायनमः ॐ चण्डेशायनमः ॐ पंचान्तकायनमः ॐ शिवोत्तमायनमः ॐ एकरुद्रायनमः ॐ कूर्मेशायनमः ॐ एकनेत्रायनमः ॐ चतुराननायनमः ॐ अजेशायनमः

व॰ ॐसर्वेशायनमः टंसोमेशायनमः ढंलांगूलीशायन
पू॰ मः ड़ंदारुकेशायनमः रुंअर्धनारीश्वरायनमः णंउ
माकांतायनमः तंआषाढीशायनमः थंदंडीशायन
मः दंअत्रीशायनमः धंमीनेशायनमः नंमेषेशायनमः
पंलोलिनेशायनमः फंशिखीशायनमः बंछगलं
डेशायनमः भंद्विरंडेशायनमः मंमहाकालाय॰ यंकं
पालीशाय॰ रंभुजंगेशाय लंपिनाकेशाय वंखड्गीशाय
शंश्वकेशाय षंभृगेशाय सं भगवीशायनमः

ब॰ प्राप्नुयात्परमामिष्टां वाणीं लक्ष्मीं न संशयः इति श्रीआ
स्तो॰ पदुद्धारणबटुकभैरवस्तोत्रं संपूर्णम् समाप्तम् ॥

53

बटुकभैरव
पं.